# संस्कृत-वार्ता:

दिनाङ्क : 17/01/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी अद्य अनेकासां रेल-परिवहन-परियोजनानां शुभारंभम् अकरोत्। मालदा-नगर-रेलस्थानके, गुवाहाटी (कामाख्या)-हावड़ा-नगरयोः मध्ये भारतस्य प्रथमं वंदेभारत्-रेल-शयन-यानाय हरितध्वजं प्रदर्शितवान्।
- प्रधानमन्त्री श्री नरेन्द्रमोदी अद्य सायं काले असम राज्यं प्रति एति। अत्रावधेयं यत् नूतन-द्वे वन्दे भारत रेल-याने च सञ्चालिते भविष्यत:
- षड्विंशत्यधिक द्विसहस्रतमवर्षस्य महाराष्ट्र-राज्यस्य निर्वाचने भाजपेति दलेन विजयम् अवाप्तम्।
- छत्तीसगढ़स्य बीजापुर जनपदे एकस्मिन् आक्रमणे द्वौ माओवादिनौ, सुरक्षाबलेन मारितौ।
- भारतीय-ऋतु-विज्ञान-विभागेन पंजाब-हरियाणा राज्ययो: अग्रिम-चतुर्दिवसेषु अल्पवृष्टे: पूर्वानुमानं प्रकटितम्।

---

<u>प्रधानमन्त्री-</u> पश्चिमवङ्ग

प्रधानमन्त्री नरेन्द्रमोदी अद्य अनेकासां रेल-परिवहन-परियोजनानां शुभारंभम् अकरोत्। प्रधानमन्त्री अद्य पश्चिमवङ्गस्य असम-राज्यस्य च द्विदिवसीय यात्रायां अस्ति। प्रवासस्य प्रथमे दिने, मालदा-नगर-रेलस्थानके, गुवाहाटी (कामाख्या)-हावड़ा-नगरयोः मध्ये भारतस्य प्रथमं वंदेभारत्-रेल्-शयन-यानाय हरितध्वजं प्रदर्शितवान्। सः पश्चिमवङ्गस्य माल्दा-नगरे सार्वजनिककार्यक्रमे सार्द्ध-द्वि-शताधिक-त्रि-सहस्र-कोटि-रूप्यकाणां बहुविध-रेल्-मार्ग-अवसंरचना-परियोजनानां शिलान्यासम् अपि करोति। अवधेयं यत् अनया परियोजनया यात्रायां सैकर्यं आयास्यति। सुरक्षा दृष्ट्या च जना: लाभं प्राप्स्यन्ति।

प्रधानमन्त्री माल्दानगरे चत्वारि नूतनेभ्य: अमृतभारत्-एक्स्प्रेस्-रेलयानेभ्य: हरितध्वजं प्रदर्शयिष्यति।

रेल मंत्रिणा अश्विनी वैष्णवेन समुदीरितं यत् नूत्नानि रेलयायानि प्रविधिनामुपयोगेन निर्मितानि। एतेषा निर्माणमपि बहद् संख्यायां क्रियते।

---------------------------------------

## प्रधानमन्त्री-असम

प्रधानमन्त्री श्री नरेन्द्रमोदी अद्य सायं काले असम राज्यं प्रति एति। द्वि-दिवसीय यात्रावधौ, अद्य श्री मोदी गुवाहाट्या: अर्जुन भोगेश्वर बरुआ-क्रीडाङ्गणे आयोक्ष्यमोणे षड्विंशत्यधिकद्विहस्र तम वर्षस्य बगुरुम्बा सांस्कृतिक कार्यक्रमे भागं ग्रहीष्यति। अवसरेऽस्मिन् बोडो समुदायस्य दशसहस्रतोप्यधिका: निपुणा: नर्तका: बागुरुंबा-नृत्यप्रस्तुर्तिं विधास्यन्ति।

प्रधानमन्त्री श्री मोदी श्व: प्राय: एकादशवादने नागांव जनपदस्य कालियाबोर इत्यत्र पंचाशतधिकनवशतोत्तर- षड्सहस्र कोटि रुप्यकाणां काजीरंगा एलिवेटेड कॉरिडोर इत्यस्या: परियोजनाया: भूमि-पूजनं च विधास्यति। अनया परियोजनया सरलतया गमनागमनं सुनिश्चितं भविष्यति। वने ये जीवा: भवन्ति तेभ्य: च सुरक्षा भविष्यति। मार्ग सुरक्षा च सुनिश्चिता भविष्यति। यात्राया: समये च न्यूनता आयास्यति। अत्रावधेयं यत् नूतन-द्वे वन्दे भारत रेल-याने च सञ्चालिते भविष्यत:।

---------------------------------------

## भाजपा-महाराष्ट्र

षड्विंशत्यधिक द्विसहस्रतमवर्षस्य महाराष्ट्र-राज्यस्य निर्वाचने भाजपेति दलेन विजयम् अवाप्तम्। ऊनत्रिंशत् नगर निगमस्य ऊनसप्तति-अधिक-अष्टशतोत्तर द्वि-सहस्र आसनेषु भाजपेति दलेन पञ्चविंशत्यधिक चतु:शतोत्तर-एकसहस्र-आसननि विजितानि। अन्तिमगणनाया: अनुसारं शिवसेना इति दलेन नवनवति: अधिक-त्रिशत आसनानि, काङ्ग्रेस इति दलेन चतुर्विंशत्यधिकत्रिशत-आसनानि, एन-सी-पी-इत्यनेन सप्तषष्ठ्युत्तरैकशत आसनानि, शिवसेना इति दलेन पंचपंचाशत् अधिक, एम. एन. एस. इति दलेन त्रयोदश आसनानि, अपि च बी. एस. पी. इति दलेन षट् आसनानि समधिगतानि।

---------------------------------------

छत्तीसगढ़-माओवादी

छत्तीसगढ़स्य बीजापुर जनपदे एकस्मिन् आक्रमणे द्वौ माओवादिनौ, सुरक्षाबलेन मारितौ। आरक्षि बलानुसारं जनपदस्यास्य उत्तरे-पश्चिमी क्षेत्रस्य वने माओवादिन: आसन्। तेषाम् अन्वेषणाभियानमपि प्रात: काले अभवत्। तदनन्तरं घटनास्थले एव प्रहारेण तेषां मृत्यु: अभवत्।

-----------------------------------------

ऋतु-विज्ञान

भारतीय-ऋतु-विज्ञान-विभागेन पंजाब-हरियाणा राज्ययो: अग्रिम-चतुर्दिवसेषु अल्पवृष्टे: पूर्वानुमानं प्रकटितम्। आकाशवाण्या: वर्ताहरै: सह सम्भाषणं कुर्वन् भारतीय-ऋतु-विज्ञान-विभागस्य वरिष्ठ वैज्ञानिक: डॉ० आर. के. जेनामणि: अब्रवीत् यत् मासस्यास्य अन्ते उत्तरपश्चिम राज्येषु वृष्टि: भवितुम् अर्हति श्री जेनामणि: अवोचत् यत् शीतप्रवाहे नीहारे च न्यूनता दृग्गोचरी भवति।

-----------------------------------------

भाजपा पश्चिम बंगाल :

प्रधानमन्त्री पश्चिम बंगालस्य स्व-यात्रावधौ तृणमूल कांग्रेस दलस्योपरि प्रश्नचिह्न: उत्थापित:। अवैध गतिविधीनां विष्ये च तेन प्रोक्तं यत् एषा गभीरा समस्या वर्तते। यया क्षेत्रीय जनसांख्यिकी परिवर्तिता सममेव भाषा च परिवर्तिता विद्यते।

नवीदिल्लीनगरे वार्ताहरसम्मेलनं सम्बोधयन् भाजपाप्रवक्ता संबितपात्रः आरोपितवान् यत् पश्चिमबङ्गस्य मुख्यमन्त्री हिंसायाः औचित्यं दर्शयति, राज्यं पृथक् कर्तुं च लक्ष्यं करोति। सः अवदत् यत् टीएमसी-नगरस्य वरिष्ठः नेता असंवैधानिकं हिंसकं च साधनं स्वीकृत्य विशेषसघनपुनरीक्षणस्य (एसआईआर) अभ्यासं स्थगयितुं प्रयतते।

-----------------------------------------

संस्कृत साप्ताहिकी

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: श्व: मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

।। इति वार्ताः ।।